॥ श्रीहनुमते नमः ॥

# श्रीहनुमत्सहस्रनामस्तोत्रम्

*ध्यानम्*

**अतुलितबलधामं हेमशैलाभदेहं दनुजवनकृशानुं ज्ञानिनामग्रगण्यम्।**

**सकलगुणनिधानं वानराणामधीशं रघुपतिप्रियभक्तं वातजातं नमामि॥**[*]

*स्तोत्रम्*

*श्रीरामचन्द्र उवाच*

**हनुमान्श्रीप्रदो वायुपुत्रो रुद्रोऽनघोऽजरः।**

**अमृत्युर्वीरवीरश्च ग्रामवासो जनाश्रयः॥ १ ॥**

**धनदो निर्गुणोऽकायो वीरो निधिपतिर्मुनिः।**

**पिङ्गाक्षो वरदो वाग्मी सीताशोकविनाशनः॥ २ ॥**

**शिवः सर्वः परोऽव्यक्तो व्यक्ताव्यक्तो रसाधरः।**

**पिङ्गकेशः पिङ्गरोमा श्रुतिगम्यः सनातनः॥ ३ ॥**

**अनादिर्भगवान् देवो विश्वहेतुर्निरामयः।**

**आरोग्यकर्ता विश्वेशो विश्वनाथो हरीश्वरः॥ ४ ॥**

**भर्गो रामो रामभक्तः कल्याणप्रकृतिः स्थिरः।**

**विश्वम्भरो विश्वमूर्तिर्विश्वाकारोऽथ विश्वपः॥ ५ ॥**

**विश्वात्मा विश्वसेव्योऽथ विश्वो विश्वहरो रविः।**

**विश्वचेष्टो विश्वगम्यो विश्वध्येयः कलाधरः॥ ६ ॥**

**प्लवङ्गमः कपिश्रेष्ठो ज्येष्ठो वैद्यो वनेचरः।**

बालो वृद्धो युवा तत्त्वं तत्त्वगम्यः सखा ह्यजः॥ ७ ॥

अञ्जनासूनुरव्यग्रो ग्रामख्यातो धराधरः।

भूर्भुवःस्वर्महर्लोको जनलोकस्तपोऽव्ययः॥ ८ ॥

सत्यमोङ्कारगम्यश्च प्रणवो व्यापकोऽमलः।

शिवधर्मप्रतिष्ठाता रामेष्टः फाल्गुनप्रियः॥ ९ ॥

गोष्पदीकृतवारीशः पूर्णकामो धरापतिः।

रक्षोघ्नः पुण्डरीकाक्षः शरणागतवत्सलः॥ १० ॥

जानकीप्राणदाता च रक्षःप्राणापहारकः।

पूर्णः सत्यः पीतवासा दिवाकरसमप्रभः॥ ११ ॥

देवोद्यानविहारी च देवताभयभञ्जनः।

भक्तोदयो भक्तलब्धो भक्तपालनतत्परः॥ १२ ॥

द्रोणहर्ता शक्तिनेता शक्तिराक्षसमारकः।

अक्षघ्नो रामदूतश्च शाकिनीजीवहारकः॥ १३ ॥

बुबुकारहतारातिर्गर्वपर्वतमर्दनः।

हेतुस्त्वहेतुः प्रांशुश्च विश्वभर्ता जगद्गुरुः॥ १४ ॥

जगन्नेता जगन्नाथो जगदीशो जनेश्वरः।

जगद्धितो हरिः श्रीशो गरुडस्मयभञ्जनः॥ १५ ॥

पार्थध्वजो वायुपुत्रोऽमितपुच्छोऽमितविक्रमः।

ब्रह्मपुच्छः परब्रह्मपुच्छो रामेष्टकारकः॥ १६ ॥

सुग्रीवादियुतो ज्ञानी वानरो वानरेश्वरः।

कल्पस्थायी चिरञ्जीवी तपनश्च सदाशिवः॥ १७ ॥

सन्ततिः सद्गतिर्भुक्तिमुक्तिदः कीर्तिदायकः।

कीर्तिः कीर्तिप्रदश्चैव समुद्रः श्रीपदः शिवः॥ १८ ॥

भक्तोदयो भक्तगम्यो भक्तभाग्यप्रदायकः।

उदधिक्रमणो देवः संसारभयनाशनः॥ १९ ॥

वार्धिबन्धनकृद् विश्वजेता विश्वप्रतिष्ठितः।

लङ्कारिः कालपुरुषो लङ्केशगृहभञ्जनः॥ २० ॥

भूतावासो वासुदेवो वसुस्त्रिभुवनेश्वरः।

श्रीरामरूपः कृष्णस्तु लङ्काप्रासादभञ्जकः॥ २१ ॥

कृष्णः कृष्णस्तुतः शान्तः शान्तिदो विश्वपावनः।

विश्वभोक्ताथ मारघ्नो ब्रह्मचारी जितेन्द्रियः॥ २२ ॥

ऊर्ध्वगो लाङ्गुली माली लाङ्गूलाहतराक्षसः।

समीरतनुजो वीरो वीरतारो जयप्रदः॥ २३ ॥

जगन्मङ्गलदः पुण्यः पुण्यश्रवणकीर्तनः।

पुण्यकीर्तिः पुण्यगतिर्जगत्पावनपावनः॥ २४ ॥

देवेशो जितमारोऽथ रामभक्तिविधायकः।

ध्याता ध्येयो लयः साक्षी चेता चैतन्यविग्रहः॥ २५ ॥

ज्ञानदः प्राणदः प्राणो जगत्प्राणः समीरणः।

विभीषणप्रियः शूरः पिप्पलाश्रयसिद्धिदः॥ २६ ॥

सिद्धः सिद्धाश्रयः कालो महोक्षः कालजान्तकः।

लङ्केशनिधनस्थायी लङ्कादाहक ईश्वरः॥ २७ ॥

चन्द्रसूर्याग्निनेत्रश्च कालाग्निः प्रलयान्तकः।

कपिलः कपिशः पुण्यराशिर्द्वादशराशिगः॥ २८ ॥

सर्वाश्रयोऽप्रमेयात्मा रेवत्यादिनिवारकः।

लक्ष्मणप्राणदाता च सीताजीवनहेतुकः॥ २९ ॥

रामध्येयो हृषीकेशो विष्णुभक्तो जटी बली।

देवारिदर्पहा होता धाता कर्ता जगत्प्रभुः॥ ३० ॥

नगरग्रामपालश्च शुद्धो बुद्धो निरत्रपः।

निरञ्जनो निर्विकल्पो गुणातीतो भयंकरः॥ ३१ ॥

हनुमांश्च दुराराध्यस्तपःसाध्यो महेश्वरः।

जानकीधनशोकोत्थतापहर्ता परात्परः॥ ३२ ॥

वाङ्मयः सदसद्रूपः कारणं प्रकृतेः परः।

भाग्यदो निर्मलो नेता पुच्छलङ्काविदाहकः॥ ३३ ॥

पुच्छबद्धयातुधानो यातुधानरिपुप्रियः।

छायापहारी भूतेशो लोकेशः सद्गतिप्रदः॥ ३४ ॥

प्लवङ्गमेश्वरः क्रोधः क्रोधसंरक्तलोचनः।

सौम्यो गुरुः काव्यकर्ता भक्तानां च वरप्रदः॥ ३५ ॥

भक्तानुकम्पी विश्वेशः पुरुहूतः पुरंदरः।

क्रोधहर्ता तमोहर्ता भक्ताभयवरप्रदः॥ ३६ ॥

अग्निर्विभावसुर्भास्वान् यमो निर्ऋतिरेव च।

वरुणो वायुगतिमान् वायुः कौबेर ईश्वरः॥ ३७ ॥

रविश्चन्द्रः कुजः सौम्यो गुरुः काव्यः शनैश्चरः।

राहुः केतुर्मरुद्धोता दाता हर्ता समीरजः॥ ३८ ॥

मशकीकृतदेवारिर्दैत्यारिर्मधुसूदनः।

कामः कपिः कामपालः कपिलो विश्वजीवनः॥ ३९ ॥

भागीरथीपदाम्भोजः सेतुबन्धविशारदः।

स्वाहा स्वधा हविः कव्यं हव्यवाहप्रकाशकः॥ ४० ॥

स्वप्रकाशो महावीरो लघुरूर्जितविक्रमः।

उड्डीनोड्डीनगतिमान् सद्गतिः पुरुषोत्तमः॥ ४१ ॥

जगदात्मा जगद्योनिर्जगदन्तो ह्यनन्तकः।

विपाप्मा निष्कलङ्कोऽथ महान् महदहंकृतिः॥ ४२ ॥

खं वायुः पृथिवी चापो वह्निर्दिक्पाल एव च।

क्षेत्रज्ञः क्षेत्रहर्ता च पल्वलीकृतसागरः॥ ४३ ॥

हिरण्मयः पुराणश्च खेचरो भूचरोऽमरः।

हिरण्यगर्भः सूत्रात्मा राजराजो विशांपतिः॥ ४४ ॥

वेदान्तवेद्य उद्गीथो वेदवेदाङ्गपारगः।

प्रतिग्रामस्थितिः सद्यःस्फूर्तिदाता गुणाकरः॥ ४५ ॥

नक्षत्रमाली भूतात्मा सुरभिः कल्पपादपः।

चिन्तामणिर्गुणनिधिः प्रजाधारो ह्यनुत्तमः॥ ४६ ॥

पुण्यश्लोकः पुरारातिर्ज्योतिष्मान्शर्वरीपतिः।

किल्किलारावसंत्रस्तभूतप्रेतपिशाचकः॥ ४७ ॥

ऋणत्रयहरः सूक्ष्मः स्थूलः सर्वगतिः पुमान्।

अपस्मारहरः स्मर्ता श्रुतिर्गाथा स्मृतिर्मनुः॥ ४८ ॥

स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं यतीश्वरः।

नादरूपः परं ब्रह्म ब्रह्म ब्रह्मपुरातनः॥ ४९ ॥

एकोऽनेको जनः शुक्लः स्वयंज्योतिरनाकुलः।

ज्योतिर्ज्योतिरनादिश्च सात्त्विको राजसस्तमः॥ ५० ॥

तमोहर्ता निरालम्बो निराकारो गुणाकरः।

गुणाश्रयो गुणमयो बृहत्कर्मा बृहद्यशाः॥ ५१ ॥

बृहद्भनुर्बृहत्पादो बृहन्मूर्धा बृहत्स्वनः।

बृहत्कर्णो बृहन्नासो बृहद्बाहुर्बृहत्तनुः॥ ५२ ॥

बृहज्जानुर्बृहत्कार्यो बृहत्पुच्छो बृहत्करः।

बृहद्गतिर्बृहत्सेव्यो बृहल्लोकफलप्रदः॥ ५३ ॥

बृहच्छक्तिर्बृहद्बाञ्छाफलदो बृहदीश्वरः।

बृहल्लोकनुतो द्रष्टा विद्यादाता जगद्गुरुः॥ ५४ ॥

देवाचार्यः सत्यवादी ब्रह्मवादी कलाधरः।

सप्तपातालगामी च मलयाचलसंश्रयः॥ ५५ ॥

उत्तराशास्थितः श्रीदो दिव्यौषधिवशः खगः।

शाखामृगः कपीन्द्रोऽथ पुराणश्रुतिचञ्चुरः॥ ५६ ॥

चतुरब्राह्मणो योगी योगगम्यः परावरः।

अनादिनिधनो व्यासो वैकुण्ठः पृथिवीपतिः॥ ५७ ॥

अपराजितो जितारातिः सदानन्दो दयायुतः।

गोपालो गोपतिर्गोप्ता कलिकालपराशरः॥ ५८ ॥

मनोवेगी सदायोगी संसारभयनाशनः।

तत्त्वदाताथ तत्त्वज्ञस्तत्त्वं तत्त्वप्रकाशकः॥ ५९ ॥

शुद्धो बुद्धो नित्यमुक्तो भक्तराजो जयद्रथः।

प्रलयोऽमितमायश्च मायातीतो विमत्सरः॥ ६० ॥

मायाभर्जितरक्षाश्च मायानिर्मितविष्टपः।

मायाश्रयश्च निर्लेपो मायानिर्वर्तकः सुखम्॥ ६१ ॥

सुखी सुखप्रदो नागो महेशकृतसंस्तवः।

महेश्वरः सत्यसंधः शरभः कलिपावनः॥ ६२ ॥

सहस्त्रकन्धरबलविध्वंसनविचक्षणः।

सहस्त्रबाहुः सहजो द्विबाहुर्द्विभुजोऽमरः॥ ६३ ॥

चतुर्भुजो दशभुजो हयग्रीवः खगाननः।

कपिवक्त्रः कपिपतिर्नरसिंहो महाद्युतिः॥ ६४ ॥

भीषणो भावगो वन्द्यो वराहो वायुरूपधृक्।

लक्ष्मणप्राणदाता च पराजितदशाननः॥ ६५ ॥

पारिजातनिवासी च वटुर्वचनकोविदः।

सुरसास्यविनिर्मुक्तः सिंहिकाप्राणहारकः॥ ६६ ॥

लङ्कालङ्कारविध्वंसी वृषदंशकरूपधृक्।

रात्रिसंचारकुशलो रात्रिंचरगृहाग्निदः॥ ६७ ॥

किङ्करान्तकरो जम्बुमालिहन्तोग्ररूपधृक्।

आकाशचारी हरिगो मेघनादरणोत्सुकः॥ ६८ ॥

मेघगम्भीरनिनदो महारावणकुलान्तकः।

कालनेमिप्राणहारी मकरीशापमोक्षदः॥ ६९ ॥

रसो रसज्ञः सम्मानो रूपं चक्षुः श्रुतिर्वचः।

घ्राणो गन्धः स्पर्शनं च स्पर्शोऽहङ्कारमानगः॥ ७० ॥

नेतिनेतीतिगम्यश्च वैकुण्ठभजनप्रियः।

गिरीशो गिरिजाकान्तो दुर्वासाः कविरङ्गिराः॥ ७१ ॥

भृगुर्वसिष्ठश्च्यवनो नारदस्तुम्बरोऽमलः।

विश्वक्षेत्रो विश्वबीजो विश्वनेत्रश्च विश्वपः॥ ७२ ॥

याजको यजमानश्च पावकः पितरस्तथा।

श्रद्धा बुद्धिः क्षमा तन्द्रा मन्त्रो मन्त्रयिता स्वरः॥ ७३ ॥

राजेन्द्रो भूपती रुण्डमाली संसारसारथिः।

नित्यसम्पूर्णकामश्च भक्तकामधुगुत्तमः॥ ७४ ॥

गणपः केशवो भ्राता पिता माता च मारुतिः।

सहस्रमूर्द्धानेकास्यः सहस्राक्षः सहस्रपात्॥ ७५ ॥

कामजित् कामदहनः कामः कामफलप्रदः।

मुद्रापहारी रक्षोघ्नः क्षितिभारहरो बलः॥ ७६ ॥

नखदंष्ट्रायुधो विष्णुर्भक्ताभयवरप्रदः।

दर्पहा दर्पदो दंष्ट्राशतमूर्तिरमूर्तिमान्॥ ७७ ॥

महानिधिर्महाभागो महाभर्गो महर्द्धिदः।

महाकारो महायोगी महातेजा महाद्युतिः॥ ७८ ॥

महासनो महानादो महामन्त्रो महामतिः।

महागमो महोदारो महादेवात्मको विभुः॥ ७९ ॥

रौद्रकर्मा क्रूरकर्मा रत्ननाभः कृतागमः।

अम्भोधिलङ्घनः सिंहः सत्यधर्मप्रमोदनः॥ ८० ॥

जितामित्रो जयः सोमो विजयो वायुनन्दनः।

जीवदाता सहस्रांशुर्मुकुन्दो भूरिदक्षिणः॥ ८१ ॥

सिद्धार्थः सिद्धिदः सिद्धसङ्कल्पः सिद्धिहेतुकः।

सप्तपातालचरणः सप्तर्षिगणवन्दितः॥ ८२ ॥

सप्ताब्धिलङ्घनो वीरः सप्तद्वीपोरुमण्डलः।

सप्ताङ्गराज्यसुखदः सप्तमातृनिषेवितः॥ ८३ ॥

सप्तस्वर्लोकमुकुटः सप्तहोता स्वराश्रयः।

सप्तच्छन्दोनिधिः सप्तच्छन्दः सप्तजनाश्रयः॥ ८४ ॥

सप्तसामोपगीतश्च सप्तपातालसंश्रयः।

मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः॥ ८५ ॥

सर्वरक्षाकरो गर्भदोषहा पुत्रपौत्रदः।

प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः॥ ८६ ॥

पराभिचारशमनो दुःखहा बन्धमोक्षदः।

नवद्वारपुराधारो नवद्वारनिकेतनः॥ ८७ ॥

नरनारायणस्तुत्यो नवनाथमहेश्वरः।

मेखली कवची खड्गी भ्राजिष्णुर्जिष्णुसारथिः॥ ८८ ॥

बहुयोजनविस्तीर्णपुच्छः पुच्छहतासुरः।

दुष्टग्रहनिहन्ता च पिशाचग्रहघातकः॥ ८९ ॥

बालग्रहविनाशी च धर्मनेता कृपाकरः।

उग्रकृत्यश्चोग्रवेग उग्रनेत्रः शतक्रतुः॥ ९० ॥

शतमन्युनुतः स्तुत्यः स्तुतिः स्तोता महाबलः।

समग्रगुणशाली च व्यग्रो रक्षोविनाशकः॥ ९१ ॥

रक्षोऽग्निदाहो ब्रह्मेशः श्रीधरो भक्तवत्सलः।

मेघनादो मेघरूपो मेघवृष्टिनिवारकः॥ ९२ ॥

मेघजीवनहेतुश्च मेघश्यामः परात्मकः।

समीरतनयो योद्धा नृत्यविद्याविशारदः॥ ९३ ॥

अमोघोऽमोघदृष्टिश्च इष्टदोऽरिष्टनाशनः।

अर्थोऽनर्थापहारी च समर्थो रामसेवकः॥ ९४ ॥

अर्थिवन्द्योऽसुरारातिः पुण्डरीकाक्ष आत्मभूः।

संकर्षणो विशुद्धात्मा विद्याराशिः सुरेश्वरः॥ ९५ ॥

अचलोद्धारको नित्यः सेतुकृद् रामसारथिः।

आनन्दः परमानन्दो मत्स्यः कूर्मो निराश्रयः॥ ९६ ॥

वाराहो नारसिंहश्च वामनो जमदग्निजः।

रामः कृष्णः शिवो बुद्धः कल्की रामाश्रयो हरिः॥ ९७ ॥

नन्दी भृङ्गी च चण्डी च गणेशो गणसेवितः।

कर्माध्यक्षः सुराध्यक्षो विश्रामो जगतीपतिः॥ ९८ ॥

जगन्नाथः कपीशश्च सर्वावासः सदाश्रयः।

सुग्रीवादिस्तुतो दान्तः सर्वकर्मा प्लवङ्गमः॥ ९९ ॥

नखदारितरक्षाश्च नखयुद्धविशारदः।

कुशलः सुधनः शेषो वासुकिस्तक्षकस्तथा॥ १०० ॥

स्वर्णवर्णो बलाढ्यश्च पुरुजेताघनाशनः।

कैवल्यरूपः कैवल्यो गरुडः पन्नगोरगः॥ १०१ ॥

किल्किलावहतारातिर्गर्वपर्वतभेदनः।

वज्राङ्गो वज्रदंष्ट्रश्च भक्तवज्रनिवारकः॥ १०२ ॥

नखायुधो मणिग्रीवो ज्वालामाली च भास्करः।

प्रौढप्रतापस्तपनो भक्ततापनिवारकः॥ १०३ ॥

शरणं जीवनं भोक्ता नानाचेष्टो ह्यचञ्चलः।

स्वस्तिमान् स्वस्तिदो दुःखशातनः पवनात्मजः॥ १०४ ॥

पावनः पवनः कान्तो भक्तागःसहनो बली।

मेघनादरिपुर्मेघनादसंहतराक्षसः॥ १०५ ॥

क्षरोऽक्षरो विनीतात्मा वानरेशः सतां गतिः।

श्रीकण्ठः शितिकण्ठश्च सहायः सहनायकः॥ १०६ ॥

अस्थूलस्त्वनणुर्भर्गो दिव्यः संसृतिनाशनः।

अध्यात्मविद्यासारश्च ह्यध्यात्मकुशलः सुधीः॥ १०७ ॥

अकल्मषः सत्यहेतुः सत्यदः सत्यगोचरः।

सत्यगर्भः सत्यरूपः सत्यः सत्यपराक्रमः॥ १०८ ॥

अञ्जनाप्राणलिङ्गश्च वायुवंशोद्भवः शुभः।

भद्ररूपो रुद्ररूपः सुरूपश्चित्ररूपधृक्॥ १०९ ॥

मैनाकवन्दितः सूक्ष्मदर्शनो विजयो जयः।

क्रान्तदिङ्मण्डलो रुद्रः प्रकटीकृतविक्रमः॥ ११० ॥

कम्बुकण्ठः प्रसन्नात्मा ह्रस्वनासो वृकोदरः।

लम्बौष्ठः कुण्डली चित्रमाली योगविदां वरः॥ १११ ॥

विपश्चित्कविरानन्दविग्रहोऽनल्पशासनः।

फाल्गुनीसूनुरव्यग्रो योगात्मा योगतत्परः॥ ११२ ॥

योगविद् योगकर्ता च योगयोनिर्दिगम्बरः।

अकारादिहकारान्तवर्णनिर्मितविग्रहः॥ ११३ ॥

उलूखलमुखः सिद्धसंस्तुतः प्रमथेश्वरः।

श्लिष्टजङ्घः श्लिष्टजानुः श्लिष्टपाणिः शिखाधरः॥ ११४ ॥

सुशर्मामितशर्मा च नारायणपरायणः।

जिष्णुर्भविष्णू रोचिष्णुर्ग्रसिष्णुः स्थाणुरेव च॥ ११५ ॥

हरिरुद्रानुसेकोऽथ कम्पनो भूमिकम्पनः।

गुणप्रवाहः सूत्रात्मा वीतरागस्तुतिप्रियः॥ ११६ ॥

नागकन्याभयध्वंसी रुक्मवर्णः कपालभृत्।

अनाकुलो भवोपायोऽनपायो वेदपारगः॥ ११७ ॥

अक्षरः पुरुषो लोकनाथ ऋक्षप्रभुर्दृढः।

अष्टाङ्गयोगफलभुक् सत्यसंधः पुरुष्टुतः॥ ११८ ॥

श्मशानस्थाननिलयः प्रेतविद्रावणक्षमः।

पञ्चाक्षरपरः पञ्चमातृको रञ्जनध्वजः॥ ११९ ॥

योगिनीवृन्दवन्द्यश्रीः शत्रुघ्नोऽनन्तविक्रमः।

ब्रह्मचारीन्द्रियरिपुर्धृतदण्डो दशात्मकः॥ १२० ॥

अप्रपञ्चः सदाचारः शूरसेनाविदारकः।

वृद्धः प्रमोद आनन्दः सप्तद्वीपपतिन्धरः॥ १२१ ॥

नवद्वारपुराधारः प्रत्यग्रः सामगायकः।

षट्चक्रधाम स्वर्लोकाभयकृन्मानदो मदः॥ १२२ ॥

सर्ववश्यकरः शक्तिरनन्तोऽनन्तमङ्गलः।

अष्टमूर्तिर्नयोपेतो विरूपः सुरसुन्दरः॥ १२३ ॥

धूमकेतुर्महाकेतुः सत्यकेतुर्महारथः।

नन्दिप्रियः स्वतन्त्रश्च मेखली डमरुप्रियः॥ १२४ ॥

लौहाङ्गः सर्वविद्धन्वी खण्डलः शर्व ईश्वरः।

फलभुक् फलहस्तश्च सर्वकर्मफलप्रदः॥ १२५ ॥

धर्माध्यक्षो धर्मपालो धर्मो धर्मप्रदोऽर्थदः।

पञ्चविंशतितत्त्वज्ञस्तारको ब्रह्मतत्परः॥ १२६ ॥

त्रिमार्गवसतिर्भीमः सर्वदुःखनिबर्हणः।

ऊर्जस्वान् निष्कलः शूली मौलिर्गर्जन्निशाचरः॥ १२७ ॥

रक्ताम्बरधरो रक्तो रक्तमाल्यो विभूषणः।

**वनमाली शुभाङ्गश्च श्वेतः श्वेताम्बरो युवा॥ १२८ ॥**

**जयोऽजयपरीवारः सहस्रवदनः कपिः।**

**शाकिनीडाकिनीयक्षरक्षोभूतप्रभञ्जकः॥ १२९ ॥**

**सद्योजातः कामगतिर्ज्ञानमूर्तिर्यशस्करः।**

**शम्भुतेजाः सार्वभौमो विष्णुभक्तः प्लवङ्गमः॥ १३० ॥**

**चतुर्नवतिमन्त्रज्ञः पौलस्त्यबलदर्पहा।**

**सर्वलक्ष्मीप्रदः श्रीमानङ्गदप्रिय ईडितः॥ १३१ ॥**

**स्मृतिबीजं सुरेशानः संसारभयनाशनः।**

**उत्तमः श्रीपरीवारः श्रितो रुद्रश्च कामधुक्॥ १३२ ॥**

*॥ इति मन्त्रमहार्णवे पूर्वखण्डे नवमतरङ्गे श्रीरामकृतं श्रीहनुमत्सहस्रनामस्तोत्रं सम्पूर्णम् ॥*

---

[*] अतुल बलके धाम, सोनेके पर्वत (सुमेरु)-के समान कान्तियुक्त शरीरवाले, दैत्यरूपी वन [-को ध्वंस करने]-के लिये अग्निरूप, ज्ञानियोंमें अग्रगण्य, सम्पूर्ण गुणोंके निधान, वानरोंके स्वामी, श्रीरघुनाथजीके प्रिय भक्त पवनपुत्र श्रीहनुमान्‌जीको मैं प्रणाम करता हूँ।

॥ श्रीहनुमते नमः ॥

# श्रीहनुमत्सहस्रनामावलिः

१ ॐ हनुमते नमः।
२ ॐ श्रीप्रदाय नमः।
३ ॐ वायुपुत्राय नमः।
४ ॐ रुद्राय नमः।
५ ॐ अनघाय नमः।
६ ॐ अजराय नमः।
७ ॐ अमृत्यवे नमः।
८ ॐ वीरवीराय नमः।
९ ॐ ग्रामवासाय नमः।
१० ॐ जनाश्रयाय नमः।
११ ॐ धनदाय नमः।
१२ ॐ निर्गुणाय नमः।
१३ ॐ अकायाय नमः।
१४ ॐ वीराय नमः।
१५ ॐ निधिपतये नमः।
१६ ॐ मुनये नमः।
१७ ॐ पिङ्गाक्षाय नमः।
१८ ॐ वरदाय नमः।
१९ ॐ वाग्मिने नमः।
२० ॐ सीताशोकविनाशनाय नमः।
२१ ॐ शिवाय नमः।
२२ ॐ सर्वस्मै नमः।
२३ ॐ परस्मै नमः।
२४ ॐ अव्यक्ताय नमः।
२५ ॐ व्यक्ताव्यक्ताय नमः।
२६ ॐ रसाधराय नमः।
२७ ॐ पिङ्गकेशाय नमः।
२८ ॐ पिङ्गरोम्णे नमः।
२९ ॐ श्रुतिगम्याय नमः।
३० ॐ सनातनाय नमः।
३१ ॐ अनादये नमः।
३२ ॐ भगवते नमः।

३३ ॐ देवाय नमः।
३४ ॐ विश्वहेतवे नमः।
३५ ॐ निरामयाय नमः।
३६ ॐ आरोग्यकर्त्रे नमः।
३७ ॐ विश्वेशाय नमः।
३८ ॐ विश्वनाथाय नमः।
३९ ॐ हरीश्वराय नमः।
४० ॐ भर्गाय नमः।
४१ ॐ रामाय नमः।
४२ ॐ रामभक्ताय नमः।
४३ ॐ कल्याणप्रकृतये नमः।
४४ ॐ स्थिराय नमः।
४५ ॐ विश्वम्भराय नमः।
४६ ॐ विश्वमूर्तये नमः।
४७ ॐ विश्वाकाराय नमः।
४८ ॐ विश्वपाय नमः।
४९ ॐ विश्वात्मने नमः।
५० ॐ विश्वसेव्याय नमः।
५१ ॐ विश्वस्मै नमः।
५२ ॐ विश्वहराय नमः।
५३ ॐ रवये नमः।
५४ ॐ विश्वचेष्टाय नमः।
५५ ॐ विश्वगम्याय नमः।
५६ ॐ विश्वध्येयाय नमः।
५७ ॐ कलाधराय नमः।
५८ ॐ प्लवङ्गमाय नमः।
५९ ॐ कपिश्रेष्ठाय नमः।
६० ॐ ज्येष्ठाय नमः।
६१ ॐ वैद्याय नमः।
६२ ॐ वनेचराय नमः।
६३ ॐ बालाय नमः।
६४ ॐ वृद्धाय नमः।
६५ ॐ यूने नमः।
६६ ॐ तत्त्वाय नमः।
६७ ॐ तत्त्वगम्याय नमः।
६८ ॐ सख्ये नमः।
६९ ॐ अजाय नमः।

७० ॐ अञ्जनासूनवे नमः।
७१ ॐ अव्यग्राय नमः।
७२ ॐ ग्रामख्याताय नमः।
७३ ॐ धराधराय नमः।
७४ ॐ भूर्लोकाय नमः।
७५ ॐ भुवर्लोकाय नमः।
७६ ॐ स्वर्लोकाय नमः।
७७ ॐ महर्लोकाय नमः।
७८ ॐ जनलोकाय नमः।
७९ ॐ तपोलोकाय नमः।
८० ॐ अव्ययाय नमः।
८१ ॐ सत्याय नमः।
८२ ॐ ओङ्कारगम्याय नमः।
८३ ॐ प्रणवाय नमः।
८४ ॐ व्यापकाय नमः।
८५ ॐ अमलाय नमः।
८६ ॐ शिवधर्मप्रतिष्ठात्रे नमः।
८७ ॐ रामेष्टाय नमः।
८८ ॐ फाल्गुनप्रियाय नमः।
८९ ॐ गोष्पदीकृतवारीशाय नमः।
९० ॐ पूर्णकामाय नमः।
९१ ॐ धरापतये नमः।
९२ ॐ रक्षोघ्नाय नमः।
९३ ॐ पुण्डरीकाक्षाय नमः।
९४ ॐ शरणागतवत्सलाय नमः।
९५ ॐ जानकीप्राणदात्रे नमः।
९६ ॐ रक्षःप्राणापहारकाय नमः।
९७ ॐ पूर्णाय नमः।
९८ ॐ सत्यायः नमः।
९९ ॐ पीतवाससे नमः।
१०० ॐ दिवाकरसमप्रभाय नमः।
१०१ ॐ देवोद्यानविहारिणे नमः।
१०२ ॐ देवताभयभञ्जनाय नमः।
१०३ ॐ भक्तोदयाय नमः।
१०४ ॐ भक्तलब्धाय नमः।
१०५ ॐ भक्तपालनतत्पराय नमः।
१०६ ॐ द्रोणहर्त्रे नमः।

१०७ ॐ शक्तिनेत्रे नमः।
१०८ ॐ शक्तिराक्षसमारकाय नमः।
१०९ ॐ अक्षघ्नाय नमः।
११० ॐ रामदूताय नमः।
१११ ॐ शाकिनीजीवहारकाय नमः।
११२ ॐ बुबुकारहतारातये नमः।
११३ ॐ गर्वपर्वतमर्दनाय नमः।
११४ ॐ हेतवे नमः।
११५ ॐ अहेतवे नमः।
११६ ॐ प्रांशवे नमः।
११७ ॐ विश्वभर्त्रे नमः।
११८ ॐ जगद्गुरवे नमः।
११९ ॐ जगन्नेत्रे नमः।
१२० ॐ जगन्नाथाय नमः।
१२१ ॐ जगदीशाय नमः।
१२२ ॐ जनेश्वराय नमः।
१२३ ॐ जगद्धिताय नमः।
१२४ ॐ हरये नमः।
१२५ ॐ श्रीशाय नमः।
१२६ ॐ गरुडस्मयभञ्जनाय नमः।
१२७ ॐ पार्थध्वजाय नमः।
१२८ ॐ वायुपुत्राय नमः।
१२९ ॐ अमितपुच्छाय नमः।
१३० ॐ अमितविक्रमाय नमः।
१३१ ॐ ब्रह्मपुच्छाय नमः।
१३२ ॐ परब्रह्मपुच्छाय नमः।
१३३ ॐ रामेष्टकारकाय नमः।
१३४ ॐ सुग्रीवादियुताय नमः।
१३५ ॐ ज्ञानिने नमः।
१३६ ॐ वानराय नमः।
१३७ ॐ वानरेश्वराय नमः।
१३८ ॐ कल्पस्थायिने नमः।
१३९ ॐ चिरञ्जीविने नमः।
१४० ॐ तपनाय नमः।
१४१ ॐ सदाशिवाय नमः।
१४२ ॐ सन्नतये नमः।
१४३ ॐ सद्गतये नमः।

१४४ ॐ भुक्तिमुक्तिदाय नमः।
१४५ ॐ कीर्तिदायकाय नमः।
१४६ ॐ कीर्तये नमः।
१४७ ॐ कीर्तिप्रदाय नमः।
१४८ ॐ समुद्राय नमः।
१४९ ॐ श्रीप्रदाय नमः।
१५० ॐ शिवाय नमः।
१५१ ॐ भक्तोदयाय नमः।
१५२ ॐ भक्तगम्याय नमः।
१५३ ॐ भक्तभाग्यप्रदायकाय नमः।
१५४ ॐ उदधिक्रमणाय नमः।
१५५ ॐ देवाय नमः।
१५६ ॐ संसारभयनाशनाय नमः।
१५७ ॐ वार्धिबन्धनकृते नमः।
१५८ ॐ विश्वजेत्रे नमः।
१५९ ॐ विश्वप्रतिष्ठिताय नमः।
१६० ॐ लङ्कायै नमः।
१६१ ॐ कालपुरुषाय नमः।
१६२ ॐ लङ्केशगृहभञ्जनाय नमः।
१६३ ॐ भूतावासाय नमः।
१६४ ॐ वासुदेवाय नमः।
१६५ ॐ वसवे नमः।
१६६ ॐ त्रिभुवनेश्वराय नमः।
१६७ ॐ श्रीरामरूपाय नमः।
१६८ ॐ कृष्णाय नमः।
१६९ ॐ लङ्काप्रासादभञ्जकाय नमः।
१७० ॐ कृष्णाय नमः।
१७१ ॐ कृष्णस्तुताय नमः।
१७२ ॐ शान्ताय नमः।
१७३ ॐ शान्तिदाय नमः।
१७४ ॐ विश्वपावनाय नमः।
१७५ ॐ विश्वभोक्त्रे नमः।
१७६ ॐ मारघ्नाय नमः।
१७७ ॐ ब्रह्मचारिणे नमः।
१७८ ॐ जितेन्द्रियाय नमः।
१७९ ॐ ऊर्ध्वगाय नमः।
१८० ॐ लाङ्गुलिने नमः।

१८१ ॐ मालिने नमः।
१८२ ॐ लाङ्गूलाहतराक्षसाय नमः।
१८३ ॐ समीरतनुजाय नमः।
१८४ ॐ वीराय नमः।
१८५ ॐ वीरताराय नमः।
१८६ ॐ जयप्रदाय नमः।
१८७ ॐ जगन्मङ्गलदाय नमः।
१८८ ॐ पुण्याय नमः।
१८९ ॐ पुण्यश्रवणकीर्तनाय नमः।
१९० ॐ पुण्यकीर्तये नमः।
१९१ ॐ पुण्यगतये नमः।
१९२ ॐ जगत्पावनपावनाय नमः।
१९३ ॐ देवेशाय नमः।
१९४ ॐ जितमाराय नमः।
१९५ ॐ रामभक्तिविधायकाय नमः।
१९६ ॐ ध्यात्रे नमः।
१९७ ॐ ध्येयाय नमः।
१९८ ॐ लयाय नमः।
१९९ ॐ साक्षिणे नमः।
२०० ॐ चेतसे नमः।
२०१ ॐ चैतन्यविग्रहाय नमः।
२०२ ॐ ज्ञानदाय नमः।
२०३ ॐ प्राणदाय नमः।
२०४ ॐ प्राणाय नमः।
२०५ ॐ जगत्प्राणाय नमः।
२०६ ॐ समीरणाय नमः।
२०७ ॐ विभीषणप्रियाय नमः।
२०८ ॐ शूराय नमः।
२०९ ॐ पिप्पलाश्रयसिद्धिदाय नमः।
२१० ॐ सिद्धाय नमः।
२११ ॐ सिद्धाश्रयाय नमः।
२१२ ॐ कालाय नमः।
२१३ ॐ महोक्षाय नमः।
२१४ ॐ कालजान्तकाय नमः।
२१५ ॐ लङ्केशनिधनाय नमः।
२१६ ॐ स्थायिने नमः।
२१७ ॐ लङ्कादाहकाय नमः।

२१८ ॐ ईश्वराय नमः।
२१९ ॐ चन्द्रसूर्याग्निनेत्राय नमः।
२२० ॐ कालाग्नये नमः।
२२१ ॐ प्रलयान्तकाय नमः।
२२२ ॐ कपिलाय नमः।
२२३ ॐ कपिशाय नमः।
२२४ ॐ पुण्यराशये नमः।
२२५ ॐ द्वादशराशिगाय नमः।
२२६ ॐ सर्वाश्रयाय नमः।
२२७ ॐ अप्रमेयात्मने नमः।
२२८ ॐ रेवत्यादिनिवारकाय नमः।
२२९ ॐ लक्ष्मणप्राणदात्रे नमः।
२३० ॐ सीताजीवनहेतुकाय नमः।
२३१ ॐ रामध्येयाय नमः।
२३२ ॐ हृषीकेशाय नमः।
२३३ ॐ विष्णुभक्ताय नमः।
२३४ ॐ जटिने नमः।
२३५ ॐ बलिने नमः।
२३६ ॐ देवारिदर्पघ्ने नमः।
२३७ ॐ होत्रे नमः।
२३८ ॐ धात्रे नमः।
२३९ ॐ कर्त्रे नमः।
२४० ॐ जगत्प्रभवे नमः।
२४१ ॐ नगरग्रामपालाय नमः।
२४२ ॐ शुद्धाय नमः।
२४३ ॐ बुद्धाय नमः।
२४४ ॐ निरत्रपाय नमः।
२४५ ॐ निरञ्जनाय नमः।
२४६ ॐ निर्विकल्पाय नमः।
२४७ ॐ गुणातीताय नमः।
२४८ ॐ भयंकराय नमः।
२४९ ॐ हनुमते नमः।
२५० ॐ दुराराध्याय नमः।
२५१ ॐ तपःसाध्याय नमः।
२५२ ॐ महेश्वराय नमः।
२५३ ॐ जानकीधनशोकोत्थतापहर्त्रे नमः।
२५४ ॐ परात्परस्मै नमः।

२५५ ॐ वाङ्मयाय नमः।
२५६ ॐ सदसद्रूपाय नमः।
२५७ ॐ कारणाय नमः।
२५८ ॐ प्रकृतेः परस्मै नमः।
२५९ ॐ भाग्यदाय नमः।
२६० ॐ निर्मलाय नमः।
२६१ ॐ नेत्रे नमः।
२६२ ॐ पुच्छलङ्काविदाहकाय नमः।
२६३ ॐ पुच्छबद्धयातुधानाय नमः।
२६४ ॐ यातुधानरिपुप्रियाय नमः।
२६५ ॐ छायापहारिणे नमः।
२६६ ॐ भूतेशाय नमः।
२६७ ॐ लोकेशाय नमः।
२६८ ॐ सद्गतिप्रदाय नमः।
२६९ ॐ प्लवङ्गमेश्वराय नमः।
२७० ॐ क्रोधाय नमः।
२७१ ॐ क्रोधसंरक्तलोचनाय नमः।
२७२ ॐ सौम्याय नमः।
२७३ ॐ गुरवे नमः।
२७४ ॐ काव्यकर्त्रे नमः।
२७५ ॐ भक्तानां वरप्रदाय नमः।
२७६ ॐ भक्तानुकम्पिने नमः।
२७७ ॐ विश्वेशाय नमः।
२७८ ॐ पुरुहूताय नमः।
२७९ ॐ पुरंदराय नमः।
२८० ॐ क्रोधहर्त्रे नमः।
२८१ ॐ तमोहर्त्रे नमः।
२८२ ॐ भक्ताभयवरप्रदाय नमः।
२८३ ॐ अग्नये नमः।
२८४ ॐ विभावसवे नमः।
२८५ ॐ भास्वते नमः।
२८६ ॐ यमाय नमः।
२८७ ॐ निर्ऋतये नमः।
२८८ ॐ वरुणाय नमः।
२८९ ॐ वायुगतिमते नमः।
२९० ॐ वायवे नमः।
२९१ ॐ कौबेराय नमः।

२९२ ॐ ईश्वराय नमः।
२९३ ॐ रवये नमः।
२९४ ॐ चन्द्राय नमः।
२९५ ॐ कुजाय नमः।
२९६ ॐ सौम्याय नमः।
२९७ ॐ गुरवे नमः।
२९८ ॐ काव्याय नमः।
२९९ ॐ शनैश्चराय नमः।
३०० ॐ राहवे नमः।
३०१ ॐ केतवे नमः।
३०२ ॐ मरुते नमः।
३०३ ॐ होत्रे नमः।
३०४ ॐ दात्रे नमः।
३०५ ॐ हर्त्रे नमः।
३०६ ॐ समीरजाय नमः।
३०७ ॐ मशकीकृतदेवास्ये नमः।
३०८ ॐ दैत्यास्ये नमः।
३०९ ॐ मधुसूदनाय नमः।
३१० ॐ कामाय नमः।
३११ ॐ कपये नमः।
३१२ ॐ कामपालाय नमः।
३१३ ॐ कपिलाय नमः।
३१४ ॐ विश्वजीवनाय नमः।
३१५ ॐ भागीरथीपदाम्भोजाय नमः।
३१६ ॐ सेतुबन्धविशारदाय नमः।
३१७ ॐ स्वाहायै नमः।
३१८ ॐ स्वधायै नमः।
३१९ ॐ हविषे नमः।
३२० ॐ कव्याय नमः।
३२१ ॐ हव्यवाहप्रकाशकाय नमः।
३२२ ॐ स्वप्रकाशाय नमः।

गीताप्रेस, गोरखपुर

# भक्तोंके परम आराध्य श्रीहनुमान्‌जी

गीताप्रेस, गोरखपुर

हंसवाहना कमलासना भगवती गायत्री

गीताप्रेस, गोरखपुर B. K. Nilkar

## राजर्षि भगीरथपर भगवती गङ्गाकी कृपा

**भगवती महालक्ष्मी**


गीताप्रेस, गोरखपुर

# भगवती अन्नपूर्णा

गीताप्रेस, गोरखपुर

# जगज्जननी भगवती सीता

गीताप्रेस, गोरखपुर

# पराम्बा श्रीललिता


गीताप्रेस, गोरखपुर

३२३ ॐ महावीराय नमः।
३२४ ॐ लघवे नमः।
३२५ ॐ ऊर्जितविक्रमाय नमः।
३२६ ॐ उड्डीनोड्डीनगतिमते नमः।
३२७ ॐ सद्गतये नमः।
३२८ ॐ पुरुषोत्तमाय नमः।
३२९ ॐ जगदात्मने नमः।
३३० ॐ जगद्योनये नमः।
३३१ ॐ जगदन्ताय नमः।
३३२ ॐ अनन्तकाय नमः।
३३३ ॐ विपाप्मने नमः।
३३४ ॐ निष्कलङ्काय नमः।
३३५ ॐ महते नमः।
३३६ ॐ महदहंकृतये नमः।
३३७ ॐ खाय नमः।
३३८ ॐ वायवे नमः।
३३९ ॐ पृथिव्यै नमः।
३४० ॐ अद्भ्यो नमः।
३४१ ॐ वह्नये नमः।
३४२ ॐ दिक्पालाय नमः।
३४३ ॐ क्षेत्रज्ञाय नमः।
३४४ ॐ क्षेत्रहर्त्रे नमः।
३४५ ॐ पल्वलीकृतसागराय नमः।
३४६ ॐ हिरण्मयाय नमः।
३४७ ॐ पुराणाय नमः।
३४८ ॐ खेचराय नमः।
३४९ ॐ भूचराय नमः।
३५० ॐ अमराय नमः।
३५१ ॐ हिरण्यगर्भाय नमः।
३५२ ॐ सूत्रात्मने नमः।
३५३ ॐ राजराजाय नमः।
३५४ ॐ विशांपतये नमः।
३५५ ॐ वेदान्तवेद्याय नमः।
३५६ ॐ उद्गीथाय नमः।
३५७ ॐ वेदवेदाङ्गपारगाय नमः।
३५८ ॐ प्रतिग्रामस्थितये नमः।

३५९ ॐ सद्यः स्फूर्तिदात्रे नमः।
३६० ॐ गुणाकराय नमः।
३६१ ॐ नक्षत्रमालिने नमः।
३६२ ॐ भूतात्मने नमः।
३६३ ॐ सुरभये नमः।
३६४ ॐ कल्पपादपाय नमः।
३६५ ॐ चिन्तामणये नमः।
३६६ ॐ गुणनिधये नमः।
३६७ ॐ प्रजाधाराय नमः।
३६८ ॐ अनुत्तमाय नमः।
३६९ ॐ पुण्यश्लोकाय नमः।
३७० ॐ पुरारातये नमः।
३७१ ॐ ज्योतिष्मते नमः।
३७२ ॐ शर्वरीपतये नमः।
३७३ ॐ किल्किलारावसंत्रस्तभूतप्रेतपिशाचकाय नमः।
३७४ ॐ ऋणत्रयहराय नमः।
३७५ ॐ सूक्ष्माय नमः।
३७६ ॐ स्थूलाय नमः।
३७७ ॐ सर्वगतये नमः।
३७८ ॐ पुंसे नमः।
३७९ ॐ अपस्मारहराय नमः।
३८० ॐ स्मर्त्रे नमः।
३८१ ॐ श्रुतये नमः।
३८२ ॐ गाथायै नमः।
३८३ ॐ स्मृतये नमः।
३८४ ॐ मनवे नमः।
३८५ ॐ स्वर्गद्वाराय नमः।
३८६ ॐ प्रजाद्वाराय नमः।
३८७ ॐ मोक्षद्वाराय नमः।
३८८ ॐ यतीश्वराय नमः।
३८९ ॐ नादरूपाय नमः।
३९० ॐ परस्मै ब्रह्मणे नमः।
३९१ ॐ ब्रह्मणे नमः।
३९२ ॐ ब्रह्मपुरातनाय नमः।
३९३ ॐ एकस्मै नमः
३९४ ॐ अनेकस्मै नमः।
३९५ ॐ जनाय नमः।

३९६ ॐ शुक्लाय नमः।
३९७ ॐ स्वयंज्योतिषे नमः।
३९८ ॐ अनाकुलाय नमः।
३९९ ॐ ज्योतिर्ज्योतिषे नमः।
४०० ॐ अनादये नमः।
४०१ ॐ सात्त्विकाय नमः।
४०२ ॐ राजसाय नमः।
४०३ ॐ तमाय नमः।
४०४ ॐ तमोहर्त्रे नमः।
४०५ ॐ निरालम्बाय नमः।
४०६ ॐ निराकाराय नमः।
४०७ ॐ गुणाकराय नमः।
४०८ ॐ गुणाश्रयाय नमः।
४०९ ॐ गुणमयाय नमः।
४१० ॐ बृहत्कर्मणे नमः।
४११ ॐ बृहद्यशसे नमः।
४१२ ॐ बृहद्धनवे नमः।
४१३ ॐ बृहत्पादाय नमः।
४१४ ॐ बृहन्मूर्ध्ने नमः।
४१५ ॐ बृहत्स्वनाय नमः।
४१६ ॐ बृहत्कर्णाय नमः।
४१७ ॐ बृहन्नासाय नमः।
४१८ ॐ बृहद्बाहवे नमः।
४१९ ॐ बृहत्तनवे नमः।
४२० ॐ बृहज्जानवे नमः।
४२१ ॐ बृहत्कार्याय नमः।
४२२ ॐ बृहत्पुच्छाय नमः।
४२३ ॐ बृहत्कराय नमः।
४२४ ॐ बृहद्व्रतये नमः।
४२५ ॐ बृहत्सेव्याय नमः।
४२६ ॐ बृहल्लोकफलप्रदाय नमः।
४२७ ॐ बृहच्छक्तये नमः।
४२८ ॐ बृहद्बाञ्छाफलदाय नमः।
४२९ ॐ बृहदीश्वराय नमः।
४३० ॐ बृहल्लोकनुताय नमः।
४३१ ॐ द्रष्ट्रे नमः।
४३२ ॐ विद्यादात्रे नमः।

४३३ ॐ जगद्गुरवे नमः।
४३४ ॐ देवाचार्याय नमः।
४३५ ॐ सत्यवादिने नमः।
४३६ ॐ ब्रह्मवादिने नमः।
४३७ ॐ कलाधराय नमः।
४३८ ॐ सप्तपातालगामिने नमः।
४३९ ॐ मलयाचलसंश्रयाय नमः।
४४० ॐ उत्तराशास्थिताय नमः।
४४१ ॐ श्रीदाय नमः।
४४२ ॐ दिव्यौषधिवशाय नमः।
४४३ ॐ खगाय नमः।
४४४ ॐ शाखामृगाय नमः।
४४५ ॐ कपीन्द्राय नमः।
४४६ ॐ पुराणश्रुतिचञ्चुराय नमः।
४४७ ॐ चतुरब्राह्मणाय नमः।
४४८ ॐ योगिने नमः।
४४९ ॐ योगगम्याय नमः।
४५० ॐ परस्मै नमः।
४५१ ॐ अवरस्मै नमः।
४५२ ॐ अनादिनिधनाय नमः।
४५३ ॐ व्यासाय नमः।
४५४ ॐ वैकुण्ठाय नमः।
४५५ ॐ पृथिवीपतये नमः।
४५६ ॐ अपराजिताय नमः।
४५७ ॐ जितारातये नमः।
४५८ ॐ सदानन्दाय नमः।
४५९ ॐ दयायुताय नमः।
४६० ॐ गोपालाय नमः।
४६१ ॐ गोपतये नमः।
४६२ ॐ गोप्त्रे नमः।
४६३ ॐ कलिकालपराशराय नमः।
४६४ ॐ मनोवेगिने नमः।
४६५ ॐ सदायोगिने नमः।
४६६ ॐ संसारभयनाशनाय नमः।
४६७ ॐ तत्त्वदात्रे नमः।
४६८ ॐ तत्त्वज्ञाय नमः।
४६९ ॐ तत्त्वाय नमः।

४७० ॐ तत्त्वप्रकाशकाय नमः।
४७१ ॐ शुद्धाय नमः।
४७२ ॐ बुद्धाय नमः।
४७३ ॐ नित्यमुक्ताय नमः।
४७४ ॐ भक्तराजाय नमः।
४७५ ॐ जयद्रथाय नमः।
४७६ ॐ प्रलयाय नमः।
४७७ ॐ अमितमायाय नमः।
४७८ ॐ मायातीताय नमः।
४७९ ॐ विमत्सराय नमः।
४८० ॐ मायाभर्जितरक्षसे नमः।
४८१ ॐ मायानिर्मितविष्टपाय नमः।
४८२ ॐ मायाश्रयाय नमः।
४८३ ॐ निर्लेपाय नमः।
४८४ ॐ मायानिर्वर्तकाय नमः।
४८५ ॐ सुखाय नमः।
४८६ ॐ सुखिने नमः।
४८७ ॐ सुखप्रदाय नमः।
४८८ ॐ नागाय नमः।
४८९ ॐ महेशकृतसंस्तवाय नमः।
४९० ॐ महेश्वराय नमः।
४९१ ॐ सत्यसंधाय नमः।
४९२ ॐ शरभाय नमः।
४९३ ॐ कलिपावनाय नमः।
४९४ ॐ सहस्त्रकन्धरबलविध्वंसनविच क्षणाय नमः।
४९५ ॐ सहस्त्रबाहवे नमः।
४९६ ॐ सहजाय नमः।
४९७ ॐ द्विबाहवे नमः।
४९८ ॐ द्विभुजाय नमः।
४९९ ॐ अमराय नमः।
५०० ॐ चतुर्भुजाय नमः।
५०१ ॐ दशभुजाय नमः।
५०२ ॐ हयग्रीवाय नमः।
५०३ ॐ खगाननाय नमः।
५०४ ॐ कपिवक्त्राय नमः।
५०५ ॐ कपिपतये नमः।
५०६ ॐ नरसिंहाय नमः।

५०७ ॐ महाद्युतये नमः।
५०८ ॐ भीषणाय नमः।
५०९ ॐ भावगाय नमः।
५१० ॐ वन्द्याय नमः।
५११ ॐ वराहाय नमः।
५१२ ॐ वायुरूपधृषे नमः।
५१३ ॐ लक्ष्मणप्राणदात्रे नमः।
५१४ ॐ पराजितदशाननाय नमः।
५१५ ॐ पारिजातनिवासिने नमः।
५१६ ॐ वटवे नमः।
५१७ ॐ वचनकोविदाय नमः।
५१८ ॐ सुरसास्यविनिर्मुक्ताय नमः।
५१९ ॐ सिंहिकाप्राणहारकाय नमः।
५२० ॐ लङ्कालङ्कारविध्वंसिने नमः।
५२१ ॐ वृषदंशकरूपधृषे नमः।
५२२ ॐ रात्रिसंचारकुशलाय नमः।
५२३ ॐ रात्रिंचरगृहाग्निदाय नमः।
५२४ ॐ किङ्करान्तकराय नमः।
५२५ ॐ जम्बुमालिहन्त्रे नमः।
५२६ ॐ उग्ररूपधृषे नमः।
५२७ ॐ आकाशचारिणे नमः।
५२८ ॐ हरिगाय नमः।
५२९ ॐ मेघनादरणोत्सुकाय नमः।
५३० ॐ मेघगम्भीरनिनदाय नमः।
५३१ ॐ महारावणकुलान्तकाय नमः।
५३२ ॐ कालनेमिप्राणहारिणे नमः।
५३३ ॐ मकरीशापमोक्षदाय नमः।
५३४ ॐ रसाय नमः।
५३५ ॐ रसज्ञाय नमः।
५३६ ॐ सम्मानाय नमः।
५३७ ॐ रूपाय नमः।
५३८ ॐ चक्षुषे नमः।
५३९ ॐ श्रुतये नमः।
५४० ॐ वचसे नमः।
५४१ ॐ घ्राणाय नमः।
५४२ ॐ गन्धाय नमः।
५४३ ॐ स्पर्शनाय नमः।

५४४ ॐ स्पर्शाय नमः।
५४५ ॐ अहंकारमानगाय नमः।
५४६ ॐ नेतिनेतीतिगम्याय नमः।
५४७ ॐ वैकुण्ठभजनप्रियाय नमः।
५४८ ॐ गिरीशाय नमः।
५४९ ॐ गिरिजाकान्ताय नमः।
५५० ॐ दुर्वाससे नमः।
५५१ ॐ कवये नमः।
५५२ ॐ अङ्गिरसे नमः।
५५३ ॐ भृगवे नमः।
५५४ ॐ वसिष्ठाय नमः।
५५५ ॐ च्यवनाय नमः।
५५६ ॐ नारदाय नमः।
५५७ ॐ तुम्बराय नमः।
५५८ ॐ अमलाय नमः।
५५९ ॐ विश्वक्षेत्राय नमः।
५६० ॐ विश्वबीजाय नमः।
५६१ ॐ विश्वनेत्राय नमः।
५६२ ॐ विश्वपाय नमः।
५६३ ॐ याजकाय नमः।
५६४ ॐ यजमानाय नमः।
५६५ ॐ पावकाय नमः।
५६६ ॐ पितृभ्यो नमः।
५६७ ॐ श्रद्धायै नमः।
५६८ ॐ बुद्ध्यै नमः।
५६९ ॐ क्षमायै नमः।
५७० ॐ तन्द्रायै नमः।
५७१ ॐ मन्त्राय नमः।
५७२ ॐ मन्त्रयित्रे नमः।
५७३ ॐ स्वराय नमः।
५७४ ॐ राजेन्द्राय नमः।
५७५ ॐ भूपतये नमः।
५७६ ॐ रुण्डमालिने नमः।
५७७ ॐ संसारसारथये नमः।
५७८ ॐ नित्यसम्पूर्णकामाय नमः।
५७९ ॐ भक्तकामदुहे नमः।
५८० ॐ उत्तमाय नमः।

५८१ ॐ गणपाय नमः।
५८२ ॐ केशवाय नमः।
५८३ ॐ भ्रात्रे नमः।
५८४ ॐ पित्रे नमः।
५८५ ॐ मात्रे नमः।
५८६ ॐ मारुतये नमः।
५८७ ॐ सहस्त्रमूर्ध्ने नमः।
५८८ ॐ अनेकास्याय नमः।
५८९ ॐ सहस्त्राक्षाय नमः।
५९० ॐ सहस्त्रपादे नमः।
५९१ ॐ कामजिते नमः।
५९२ ॐ कामदहनाय नमः।
५९३ ॐ कामाय नमः।
५९४ ॐ कामफलप्रदाय नमः।
५९५ ॐ मुद्रापहारिणे नमः।
५९६ ॐ रक्षोघ्नाय नमः।
५९७ ॐ क्षितिभारहराय नमः।
५९८ ॐ बलाय नमः।
५९९ ॐ नखदंष्ट्रायुधाय नमः।
६०० ॐ विष्णवे नमः
६०१ ॐ भक्ताभयवरप्रदाय नमः।
६०२ ॐ दर्पघ्ने नमः।
६०३ ॐ दर्पदाय नमः।
६०४ ॐ दंष्ट्राशतमूर्तये नमः।
६०५ ॐ अमूर्तिमते नमः।
६०६ ॐ महानिधये नमः।
६०७ ॐ महाभागाय नमः।
६०८ ॐ महाभर्गाय नमः।
६०९ ॐ महर्द्धिदाय नमः।
६१० ॐ महाकाराय नमः।
६११ ॐ महायोगिने नमः।
६१२ ॐ महातेजसे नमः।
६१३ ॐ महाद्युतये नमः।
६१४ ॐ महासनाय नमः।
६१५ ॐ महानादाय नमः
६१६ ॐ महामन्त्राय नमः।
६१७ ॐ महामतये नमः।

६१८ ॐ महागमाय नमः।
६१९ ॐ महोदाराय नमः।
६२० ॐ महादेवात्मकाय नमः।
६२१ ॐ विभवे नमः।
६२२ ॐ रौद्रकर्मणे नमः।
६२३ ॐ क्रूरकर्मणे नमः।
६२४ ॐ रत्ननाभाय नमः।
६२५ ॐ कृतागमाय नमः।
६२६ ॐ अम्भोधिलङ्घनाय नमः।
६२७ ॐ सिंहाय नमः।
६२८ ॐ सत्यधर्मप्रमोदनाय नमः।
६२९ ॐ जितामित्राय नमः।
६३० ॐ जयाय नमः।
६३१ ॐ सोमाय नमः।
६३२ ॐ विजयाय नमः।
६३३ ॐ वायुनन्दनाय नमः।
६३४ ॐ जीवदात्रे नमः।
६३५ ॐ सहस्त्रांशवे नमः।
६३६ ॐ मुकुन्दाय नमः।
६३७ ॐ भूरिदक्षिणाय नमः।
६३८ ॐ सिद्धार्थाय नमः।
६३९ ॐ सिद्धिदाय नमः।
६४० ॐ सिद्धसङ्कल्पाय नमः।
६४१ ॐ सिद्धिहेतुकाय नमः।
६४२ ॐ सप्तपातालचरणाय नमः।
६४३ ॐ सप्तर्षिगणवन्दिताय नमः।
६४४ ॐ सप्ताब्धिलङ्घनाय नमः।
६४५ ॐ वीराय नमः।
६४६ ॐ सप्तद्वीपोरुमण्डलाय नमः।
६४७ ॐ सप्ताङ्गराज्यसुखदाय नमः।
६४८ ॐ सप्तमातृनिषेविताय नमः।
६४९ ॐ सप्तस्वर्लोकमुकुटाय नमः।
६५० ॐ सप्तहोत्रे नमः।
६५१ ॐ स्वराश्रयाय नमः।
६५२ ॐ सप्तच्छन्दोनिधये नमः।
६५३ ॐ सप्तच्छन्दसे नमः।
६५४ ॐ सप्तजनाश्रयाय नमः।

६५५ ॐ सप्तसामोपगीताय नमः।
६५६ ॐ सप्तपातालसंश्रयाय नमः।
६५७ ॐ मेधादाय नमः।
६५८ ॐ कीर्तिदाय नमः।
६५९ ॐ शोकहारिणे नमः।
६६० ॐ दौर्भाग्यनाशनाय नमः।
६६१ ॐ सर्वरक्षाकराय नमः।
६६२ ॐ गर्भदोषघ्ने नमः।
६६३ ॐ पुत्रपौत्रदाय नमः।
६६४ ॐ प्रतिवादिमुखस्तम्भाय नमः।
६६५ ॐ रुष्टचित्तप्रसादनाय नमः।
६६६ ॐ पराभिचारशमनाय नमः।
६६७ ॐ दुःखघ्ने नमः।
६६८ ॐ बन्धमोक्षदाय नमः।
६६९ ॐ नवद्वारपुराधाराय नमः।
६७० ॐ नवद्वारनिकेतनाय नमः।
६७१ ॐ नरनारायणस्तुत्याय नमः।
६७२ ॐ नवनाथमहेश्वराय नमः।
६७३ ॐ मेखलिने नमः।
६७४ ॐ कवचिने नमः।
६७५ ॐ खड्गिने नमः।
६७६ ॐ भ्राजिष्णवे नमः।
६७७ ॐ जिष्णुसारथये नमः।
६७८ ॐ बहुयोजनविस्तीर्णपुच्छाय नमः।
६७९ ॐ पुच्छहतासुराय नमः।
६८० ॐ दुष्टग्रहनिहन्त्रे नमः।
६८१ ॐ पिशाचग्रहघातकाय नमः।
६८२ ॐ बालग्रहविनाशिने नमः।
६८३ ॐ धर्मनेत्रे नमः।
६८४ ॐ कृपाकराय नमः।
६८५ ॐ उग्रकृत्याय नमः।
६८६ ॐ उग्रवेगाय नमः।
६८७ ॐ उग्रनेत्राय नमः।
६८८ ॐ शतक्रतवे नमः।
६८९ ॐ शतमन्युनुताय नमः।
६९० ॐ स्तुत्याय नमः।
६९१ ॐ स्तुतये नमः।

६९२ ॐ स्तोत्रे नमः।
६९३ ॐ महाबलाय नमः।
६९४ ॐ समग्रगुणशालिने नमः।
६९५ ॐ व्यग्राय नमः।
६९६ ॐ रक्षोविनाशकाय नमः।
६९७ ॐ रक्षोऽग्निदाहाय नमः।
६९८ ॐ ब्रह्मेशाय नमः।
६९९ ॐ श्रीधराय नमः।
७०० ॐ भक्तवत्सलाय नमः।
७०१ ॐ मेघनादाय नमः।
७०२ ॐ मेघरूपाय नमः।
७०३ ॐ मेघवृष्टिनिवारकाय नमः।
७०४ ॐ मेघजीवनहेतवे नमः।
७०५ ॐ मेघश्यामाय नमः।
७०६ ॐ परात्मकाय नमः।
७०७ ॐ समीरतनयाय नमः।
७०८ ॐ योद्ध्रे नमः।
७०९ ॐ नृत्यविद्याविशारदाय नमः।
७१० ॐ अमोघाय नमः।
७११ ॐ अमोघदृष्टये नमः।
७१२ ॐ इष्टदाय नमः।
७१३ ॐ अरिष्टनाशनाय नमः।
७१४ ॐ अर्थाय नमः।
७१५ ॐ अनर्थापहारिणे नमः।
७१६ ॐ समर्थाय नमः।
७१७ ॐ रामसेवकाय नमः।
७१८ ॐ अर्थिवन्द्याय नमः।
७१९ ॐ असुरारातये नमः।
७२० ॐ पुण्डरीकाक्षाय नमः।
७२१ ॐ आत्मभुवे नमः।
७२२ ॐ संकर्षणाय नमः।
७२३ ॐ विशुद्धात्मने नमः।
७२४ ॐ विद्याराशये नमः।
७२५ ॐ सुरेश्वराय नमः।
७२६ ॐ अचलोद्धारकाय नमः।
७२७ ॐ नित्याय नमः।
७२८ ॐ सेतुकृते नमः।

७२९ ॐ रामसारथये नमः।
७३० ॐ आनन्दाय नमः।
७३१ ॐ परमानन्दाय नमः।
७३२ ॐ मत्स्याय नमः।
७३३ ॐ कूर्माय नमः।
७३४ ॐ निराश्रयाय नमः।
७३५ ॐ वाराहाय नमः।
७३६ ॐ नारसिंहाय नमः।
७३७ ॐ वामनाय नमः।
७३८ ॐ जमदग्निजाय नमः।
७३९ ॐ रामाय नमः।
७४० ॐ कृष्णाय नमः।
७४१ ॐ शिवाय नमः।
७४२ ॐ बुद्धाय नमः।
७४३ ॐ कल्किने नमः।
७४४ ॐ रामाश्रयाय नमः।
७४५ ॐ हरये नमः।
७४६ ॐ नन्दिने नमः।
७४७ ॐ भृङ्गिणे नमः।
७४८ ॐ चण्डिने नमः।
७४९ ॐ गणेशाय नमः।
७५० ॐ गणसेविताय नमः।
७५१ ॐ कर्माध्यक्षाय नमः।
७५२ ॐ सुराध्यक्षाय नमः।
७५३ ॐ विश्रामाय नमः।
७५४ ॐ जगतीपतये नमः।
७५५ ॐ जगन्नाथाय नमः।
७५६ ॐ कपीशाय नमः।
७५७ ॐ सर्वावासाय नमः।
७५८ ॐ सदाश्रयाय नमः।
७५९ ॐ सुग्रीवादिस्तुताय नमः।
७६० ॐ दान्ताय नमः।
७६१ ॐ सर्वकर्मणे नमः॥
७६२ ॐ प्लवङ्गमाय नमः।
७६३ ॐ नखदारितरक्षसे नमः।
७६४ ॐ नखयुद्धविशारदाय नमः।
७६५ ॐ कुशलाय नमः।

७६६ ॐ सुधनाय नमः।
७६७ ॐ शेषाय नमः।
७६८ ॐ वासुकये नमः।
७६९ ॐ तक्षकाय नमः।
७७० ॐ स्वर्णवर्णाय नमः।
७७१ ॐ बलाढ्याय नमः।
७७२ ॐ पुरुजेत्रे नमः।
७७३ ॐ अघनाशनाय नमः।
७७४ ॐ कैवल्यरूपाय नमः।
७७५ ॐ कैवल्याय नमः।
७७६ ॐ गरुडाय नमः।
७७७ ॐ पन्नगोरगाय नमः।
७७८ ॐ किल्किलावहतारातये नमः।
७७९ ॐ गर्वपर्वतभेदनाय नमः।
७८० ॐ वज्राङ्गाय नमः।
७८१ ॐ वज्रदंष्ट्राय नमः।
७८२ ॐ भक्तवज्रनिवारकाय नमः।
७८३ ॐ नखायुधाय नमः।
७८४ ॐ मणिग्रीवाय नमः।
७८५ ॐ ज्वालामालिने नमः।
७८६ ॐ भास्कराय नमः।
७८७ ॐ प्रौढप्रतापाय नमः।
७८८ ॐ तपनाय नमः।
७८९ ॐ भक्ततापनिवारकाय नमः।
७९० ॐ शरणाय नमः।
७९१ ॐ जीवनाय नमः।
७९२ ॐ भोक्त्रे नमः।
७९३ ॐ नानाचेष्टाय नमः।
७९४ ॐ अचञ्चलाय नमः।
७९५ ॐ स्वस्तिमते नमः।
७९६ ॐ स्वस्तिदाय नमः।
७९७ ॐ दुःखशातनाय नमः।
७९८ ॐ पवनात्मजाय नमः।
७९९ ॐ पावनाय नमः।
८०० ॐ पवनाय नमः।
८०१ ॐ कान्ताय नमः।
८०२ ॐ भक्तागःसहनाय नमः।

८०३ ॐ बलिने नमः।
८०४ ॐ मेघनादरिपवे नमः।
८०५ ॐ मेघनादसंहतराक्षसाय नमः।
८०६ ॐ क्षराय नमः।
८०७ ॐ अक्षराय नमः।
८०८ ॐ विनीतात्मने नमः।
८०९ ॐ वानरेशाय नमः।
८१० ॐ सतां गतये नमः।
८११ ॐ श्रीकण्ठाय नमः।
८१२ ॐ शितिकण्ठाय नमः।
८१३ ॐ सहायाय नमः।
८१४ ॐ सहनायकाय नमः।
८१५ ॐ अस्थूलाय नमः।
८१६ ॐ अनणवे नमः।
८१७ ॐ भर्गाय नमः।
८१८ ॐ दिव्याय नमः।
८१९ ॐ संसृतिनाशनाय नमः।
८२० ॐ अध्यात्मविद्यासाराय नमः।
८२१ ॐ अध्यात्मकुशलाय नमः।
८२२ ॐ सुधिये नमः।
८२३ ॐ अकल्मषाय नमः।
८२४ ॐ सत्यहेतवे नमः।
८२५ ॐ सत्यदाय नमः।
८२६ ॐ सत्यगोचराय नमः।
८२७ ॐ सत्यगर्भाय नमः।
८२८ ॐ सत्यरूपाय नमः।
८२९ ॐ सत्याय नमः।
८३० ॐ सत्यपराक्रमाय नमः।
८३१ ॐ अञ्जनाप्राणलिङ्गाय नमः।
८३२ ॐ वायुवंशोद्भवाय नमः।
८३३ ॐ शुभाय नमः।
८३४ ॐ भद्ररूपाय नमः।
८३५ ॐ रुद्ररूपाय नमः।
८३६ ॐ सुरूपाय नमः।
८३७ ॐ चित्ररूपधृषे नमः।
८३८ ॐ मैनाकवन्दिताय नमः।
८३९ ॐ सूक्ष्मदर्शनाय नमः।

८४० ॐ विजयाय नमः।
८४१ ॐ जयाय नमः।
८४२ ॐ क्रान्तदिङ्मण्डलाय नमः।
८४३ ॐ रुद्राय नमः।
८४४ ॐ प्रकटीकृतविक्रमाय नमः।
८४५ ॐ कम्बुकण्ठाय नमः।
८४६ ॐ प्रसन्नात्मने नमः।
८४७ ॐ ह्रस्वनासाय नमः।
८४८ ॐ वृकोदराय नमः।
८४९ ॐ लम्बौष्ठाय नमः।
८५० ॐ कुण्डलिने नमः।
८५१ ॐ चित्रमालिने नमः।
८५२ ॐ योगविदां वराय नमः।
८५३ ॐ विपश्चिते नमः।
८५४ ॐ कवये नमः।
८५५ ॐ आनन्दविग्रहाय नमः।
८५६ ॐ अनल्पशासनाय नमः।
८५७ ॐ फाल्गुनीसूनवे नमः।
८५८ ॐ अव्यग्राय नमः।
८५९ ॐ योगात्मने नमः।
८६० ॐ योगतत्पराय नमः।
८६१ ॐ योगविदे नमः।
८६२ ॐ योगकर्त्रे नमः।
८६३ ॐ योगयोनये नमः।
८६४ ॐ दिगम्बराय नमः।
८६५ ॐ अकारादिहकारान्तवर्ण-निर्मितविग्रहाय नमः।
८६६ ॐ उलूखलमुखाय नमः।
८६७ ॐ सिद्धसंस्तुताय नमः।
८६८ ॐ प्रमथेश्वराय नमः।
८६९ ॐ श्लिष्टजङ्घाय नमः।
८७० ॐ श्लिष्टजानवे नमः।
८७१ ॐ श्लिष्टपाणये नमः।
८७२ ॐ शिखाधराय नमः।
८७३ ॐ सुशर्मणे नमः।
८७४ ॐ अमितशर्मणे नमः।
८७५ ॐ नारायणपरायणाय नमः।
८७६ ॐ जिष्णवे नमः।

८७७ ॐ भविष्णवे नमः।
८७८ ॐ रोचिष्णवे नमः।
८७९ ॐ ग्रसिष्णवे नमः।
८८० ॐ स्थाणवे नमः।
८८१ ॐ हरिरुद्रानुसेकाय नमः।
८८२ ॐ कम्पनाय नमः।
८८३ ॐ भूमिकम्पनाय नमः।
८८४ ॐ गुणप्रवाहाय नमः।
८८५ ॐ सूत्रात्मने नमः।
८८६ ॐ वीतरागस्तुतिप्रियाय नमः।
८८७ ॐ नागकन्याभयध्वंसिने नमः।
८८८ ॐ रुक्मवर्णाय नमः।
८८९ ॐ कपालभृते नमः।
८९० ॐ अनाकुलाय नमः।
८९१ ॐ भवोपायाय नमः।
८९२ ॐ अनपायाय नमः।
८९३ ॐ वेदपारगाय नमः।
८९४ ॐ अक्षराय नमः।
८९५ ॐ पुरुषाय नमः।
८९६ ॐ लोकनाथाय नमः।
८९७ ॐ ऋक्षप्रभवे नमः।
८९८ ॐ दृढाय नमः।
८९९ ॐ अष्टाङ्गयोगफलभुजे नमः।
९०० ॐ सत्यसंधाय नमः।
९०१ ॐ पुरुष्टुताय नमः।
९०२ ॐ श्मशानस्थाननिलयाय नमः।
९०३ ॐ प्रेतविद्रावणक्षमाय नमः।
९०४ ॐ पञ्चाक्षरपराय नमः।
९०५ ॐ पञ्चमातृकाय नमः।
९०६ ॐ रञ्जनध्वजाय नमः।
९०७ ॐ योगिनीवृन्दवन्द्यश्रियै नमः।
९०८ ॐ शत्रुघ्नाय नमः।
९०९ ॐ अनन्तविक्रमाय नमः।
९१० ॐ ब्रह्मचारिणे नमः।
९११ ॐ इन्द्रियरिपवे नमः।
९१२ ॐ धृतदण्डाय नमः।
९१३ ॐ दशात्मकाय नमः।

११४ ॐ अप्रपञ्चाय नमः।
११५ ॐ सदाचाराय नमः।
११६ ॐ शूरसेनाविदारकाय नमः।
११७ ॐ वृद्धाय नमः।
११८ ॐ प्रमोदाय नमः।
११९ ॐ आनन्दाय नमः।
१२० ॐ सप्तद्वीपपतिन्धराय नमः।
१२१ ॐ नवद्वारपुराधाराय नमः।
१२२ ॐ प्रत्यग्राय नमः।
१२३ ॐ सामगायकाय नमः।
१२४ ॐ षट्चक्रधाम्ने नमः।
१२५ ॐ स्वर्लोकाभयकृते नमः।
१२६ ॐ मानदाय नमः।
१२७ ॐ मदाय नमः।
१२८ ॐ सर्ववश्यकराय नमः।
१२९ ॐ शक्तये नमः।
१३० ॐ अनन्ताय नमः।
१३१ ॐ अनन्तमङ्गलाय नमः।
१३२ ॐ अष्टमूर्तये नमः।
१३३ ॐ नयोपेताय नमः।
१३४ ॐ विरूपाय नमः।
१३५ ॐ सुरसुन्दराय नमः।
१३६ ॐ धूमकेतवे नमः।
१३७ ॐ महाकेतवे नमः।
१३८ ॐ सत्यकेतवे नमः।
१३९ ॐ महारथाय नमः।
१४० ॐ नन्दिप्रियाय नमः।
१४१ ॐ स्वतन्त्राय नमः।
१४२ ॐ मेखलिने नमः।
१४३ ॐ डमरुप्रियाय नमः।
१४४ ॐ लौहाङ्गाय नमः।
१४५ ॐ सर्वविदे नमः।
१४६ ॐ धन्विने नमः।
१४७ ॐ खण्डलाय नमः।
१४८ ॐ शर्वाय नमः।
१४९ ॐ ईश्वराय नमः।
१५० ॐ फलभुजे नमः।

१५१ ॐ फलहस्ताय नमः।
१५२ ॐ सर्वकर्मफलप्रदाय नमः।
१५३ ॐ धर्माध्यक्षाय नमः।
१५४ ॐ धर्मपालाय नमः।
१५५ ॐ धर्माय नमः।
१५६ ॐ धर्मप्रदाय नमः।
१५७ ॐ अर्थदाय नमः।
१५८ ॐ पञ्चविंशतितत्त्वज्ञाय नमः।
१५९ ॐ तारकाय नमः।
१६० ॐ ब्रह्मतत्पराय नमः।
१६१ ॐ त्रिमार्गवसतये नमः।
१६२ ॐ भीमाय नमः।
१६३ ॐ सर्वदुःखनिबर्हणाय नमः।
१६४ ॐ ऊर्जस्वते नमः।
१६५ ॐ निष्कलाय नमः।
१६६ ॐ शूलिने नमः।
१६७ ॐ मौलिने नमः।
१६८ ॐ गर्जन्निशाचराय नमः।
१६९ ॐ रक्ताम्बरधराय नमः।
१७० ॐ रक्ताय नमः।
१७१ ॐ रक्तमाल्याय नमः।
१७२ ॐ विभूषणाय नमः।
१७३ ॐ वनमालिने नमः।
१७४ ॐ शुभाङ्गाय नमः।
१७५ ॐ श्वेताय नमः।
१७६ ॐ श्वेताम्बराय नमः।
१७७ ॐ यूने नमः।
१७८ ॐ जयाय नमः।
१७९ ॐ अजयपरीवाराय नमः।
१८० ॐ सहस्त्रवदनाय नमः।
१८१ ॐ कपये नमः।
१८२ ॐ शाकिनीडाकिनीयक्षरक्षो-भूतप्रभञ्जकाय नमः।
१८३ ॐ सद्योजाताय नमः।
१८४ ॐ कामगतये नमः।
१८५ ॐ ज्ञानमूर्तये नमः।
१८६ ॐ यशस्कराय नमः।
१८७ ॐ शम्भुतेजसे नमः।

९८८ ॐ सार्वभौमाय नमः।
९८९ ॐ विष्णुभक्ताय नमः।
९९० ॐ प्लवङ्गमाय नमः।
१९९१ ॐ चतुर्नवतिमन्त्रज्ञाय नमः।
१९९२ ॐ पौलस्त्यबलदर्पघ्ने नमः।
१९९३ ॐ सर्वलक्ष्मीप्रदाय नमः।
१९९४ ॐ श्रीमते नमः।
१९९५ ॐ अङ्गदप्रियाय नमः।
१९९६ ॐ ईडिताय नमः।
१९९७ ॐ स्मृतिबीजाय नमः।
१९९८ ॐ सुरेशानाय नमः।
१९९९ ॐ संसारभयनाशनाय नमः।
१००० ॐ उत्तमाय नमः।
१००१ ॐ श्रीपरीवाराय नमः।
१००२ ॐ श्रिताय नमः।
१००३ ॐ रुद्राय नमः।
१००४ ॐ कामदुहे नमः।

*॥ इति मन्त्रमहार्णवे श्रीहनुमत्सहस्त्रनामावलिः सम्पूर्णा ॥*